
# १४. उपकारस्य स्मरणम् ।



**रामायणम् आदिकाव्यम् । रामायणस्य रचयिता वाल्मीकिः । वाल्मीकिः आदिकविः । श्रीरामस्य चरितम् अस्य ग्रन्थस्य विषयः । एषः प्रसङ्गः रामायणात् ।**

मारुतिः सीतायाः अन्वेषणार्थं लङ्कां प्रति उड्डयते । मार्गे महासागरः अस्ति । तस्य तले अवर्तत मैनाकः नाम पर्वतः । यदा मैनाकः गगने मारुतिं पश्यति तदा सः उद्गच्छति । समुद्रात् बहिः आयाति । मारुतिना क्रमणीयः मार्गः दीर्घः । मध्ये विश्रामार्थं स्थानमपि नास्ति इति मैनाकः जानाति । सः तस्य साहाय्यं कर्तुम् इच्छति । अतः मैनाकः मारुतिं प्रार्थयते, ''महाकपे! अलं परिश्रमेण, कृपया मम कूटे विश्रामं करोतु ।''

किमर्थं मैनाकः मारुतेः साहाय्यार्थम् उद्युक्तः? अपि सः मारुतेः आशीर्वचनम् इच्छति? न खलु । एतत् तु उपकारस्य स्मरणम् । मारुतेः तातः पवनदेवः मैनाकस्य साहाय्यम् अकरोत् पुरा । तदा सर्वे पर्वताः सपक्षाः । ते आकाशे स्वेच्छया विहरन्ति स्म, सहसा भूमौ निपतन्ति स्म । तेन त्रस्ताः ऋषयः इन्द्रम् उपागच्छन् । इन्द्रः पर्वतेभ्यः अकुप्यत् । सः वज्रेण पर्वतानां पक्षान् छेत्तुं प्रारभत । यदा इन्द्रः मैनाकं प्रति अगच्छत् तदैव पवनदेवः वेगेन तं समुद्रतलम् अनयत् । एवं पवनदेवः मैनाकं वज्रप्रहारात् अरक्षत् । मैनाकः पवनदेवस्य एतम् उपकारं स्मरति स्म । सः अचिन्तयत्, ''कृते च प्रतिकर्तव्यम् एष धर्मः सनातनः'' । अतः मैनाकः पवनपुत्रस्य मारुतेः साहाय्यम् अकरोत् । मैनाकस्य आतिथ्येन मारुतिः प्रीतः । तथापि विश्रामम् अकृत्वा सः कार्यसिद्ध्यर्थम् अग्रे सरति ।

## भाषाभ्यासः

१. एकवाक्येन उत्तरं लिखत ।

१) मारुतिः कस्याः अन्वेषणार्थं उड्डयते?
२) पर्वतस्य नाम किम्?
३) पुरा सर्वे पर्वताः कीदृशाः?
४) पर्वतैः के त्रस्ताः?
५) मैनाकं समुद्रतलं कः नयति?

२. प्रश्ननिर्माणं कुरुत ।

१) पवनदेवः मैनाकं वज्रप्रहारात् रक्षति ।
२) ऋषयः इन्द्रम् उपागच्छन् ।
३) इन्द्रः पर्वतेभ्यः अकुप्यत् ।
४) मैनाकः समुद्रात् बहिः आयाति ।

३. पृथक् कुरुत ।

| नाम | सर्वनाम | विशेषणम् | क्रियापदम् |
|---|---|---|---|
| | | | |

(मारुतिः, तम्, ऋषयः, दीर्घः, प्रीतः, चिन्तयति, उद्गच्छति, सः)

४. समूहेतरपदं चिनुत । १) मारुतिः, पवनपुत्रः, हनुमान्, पावकः । ३) मैनाकः, नगः, गिरिः, अचलः।
२) सुरपतिः, शक्रः, वज्रम्, इन्द्रः ।

५. विरुद्धार्थकशब्दान् लिखत ।
१) बहिः × २) उद्युक्तः × ३) स्मरणम् ×

६. पाठे 'मारुति' शब्दस्य स्थाने 'पवनसुत' अपि च 'पर्वत' इत्यस्य स्थाने 'अद्रि' इति शब्दं प्रयुज्य पाठं पुनर्लिखत ।

७. माध्यमभाषया लिखत ।
१. 'उपकारस्य स्मरणं' मैनाकेन कथं कृतम्?
२. मारुतेः उड्डाणकथां श्रुत्वा कस्य आधुनिककथापात्रस्य स्मरणं भवति?
३. रामायणे येषाम् उल्लेखः तेषाम् अन्य-पशु-पक्षिणां विषयम् अनुसृत्य सन्दर्भान् लिखत ।
४. यदि पर्वताः अधुना अपि पक्षयुक्ताः स्युः तर्हि किं भविष्यति?

## प्रश्नार्थकाः

प्रश्ननिर्माणार्थं 'किम्' सर्वनाम उपयुज्यते । तथा 'क'-अक्षरेण अन्ये प्रश्नार्थकशब्दाः आरभन्ते । ते ककाराः।
यथा- किम्, कुत्र, कति, कदा, कुतः, कथम्, किमर्थम् ।

- प्रश्ननिर्माणं कथम्?

१. शिक्षिका सुधाखण्डेन लिखति । शिक्षिका **केन** लिखति?
२. रामः सीतायै फलानि यच्छति । रामः **कस्यै** फलानि यच्छति?
३. चटका निवासाय नीडं रचयति । चटका **किमर्थं** नीडं रचयति?
४. सा सुस्वरं गायति । सा **कथं** गायति?

- प्रतिपदं ककारः कथं युज्यते?

अमेयः गृहे सायङ्काले पद्यकाव्यानि ज्ञानार्थम् उच्चैः पठति ।
१. **कः** गृहे सायङ्काले पद्यकाव्यानि ज्ञानार्थम् उच्चैः पठति ?
२. अमेयः **कुत्र** सायङ्काले पद्यकाव्यानि ज्ञानार्थम् उच्चैः पठति ?
३. अमेयः गृहे **कदा** पद्यकाव्यानि ज्ञानार्थम् उच्चैः पठति ?
४. अमेयः गृहे सायङ्काले **किं** ज्ञानार्थम् उच्चैः पठति ?
५. अमेयः गृहे सायङ्काले पद्यकाव्यानि **किमर्थम्** उच्चैः पठति ?
६. अमेयः गृहे सायङ्काले पद्यकाव्यानि ज्ञानार्थम् **कथं** पठति ?

IDILZ6

**प्रश्ननिर्माणार्थम् उचितं पर्यायं चिनुत ।**

१. आकाशे मेघाः गर्जन्ति । (कः/के) २. छात्रैः शाला शोभते । (कस्मै/कैः)
३. खगानां समूहः गगने वर्तते । (केषां/कासाम्) ४. शिक्षकान् प्रति आदरः आवश्यकः ।(केषाम्/कान्)
५. अहम् अनन्तरं भोजनं करोमि । (कदा/कुत्र) ६. ते पठनाय विद्यालयं गच्छन्ति । (कदा/किमर्थम्)